International Journal of Sanskrit Research 2020; 6(2): 21-25

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 21-25
© 2020 IJSR
www.anantaajournal.com
Received: 14-01-2020
Accepted: 18-05-2020

डा. दयानन्दपाणिग्राही
सहायकाचार्य, अद्वैतवेदान्तविभाग:
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालय:,
हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवंगा,
पश्चिम बंगाल, भारत।

Correspondence
डा. दयानन्दपाणिग्राही
सहायकाचार्य, अद्वैतवेदान्तविभाग:
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालय,
हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवंगा,
पश्चिम बंगाल, भारत।

# पञ्चदशीस्थनाटकदीपप्रकरणानुसारं साक्षिस्वरूपविवेचनम्

**डा. दयानन्दपाणिग्राही**

**शोधसार:**
परम-अद्वैतवेदान्ती श्रीमद्विद्यारण्यमुनि: यो खलु शृङ्गगिरौ दक्षिणाम्नायशंकरपीठस्य मठाधीशोऽभूत्, तेन विरचितेष्वद्वैतग्रन्थेषु पञ्चदशीति ग्रन्थो नितरामितरग्रन्थान् अद्वैततत्त्वप्रतिष्ठापने अतिशेते। पञ्चदशप्रकरणविशिष्टोऽयं ग्रन्थ: प्रमुखरूपेण विवेक-दीप-आनन्दचेति त्रिषु विभागेषु विभज्यते यत्र प्रत्येकमपि विभागे पञ्च अध्याया: सन्ति। तत्र दीपस्थप्रकरणेषु नाटकदीप इति भिन्नमेकं प्रकरणं विद्यते, यत्र नाटकस्थरंगमंचादीनामुदाहरणं प्रस्तुत्य परमश्रुतिसारतत्त्वं प्रस्तूयते यदत्र साक्षी इति तत्त्वत्वेन प्रदर्श्यते।

**कूटशब्दा: -** पञ्चदशी, नाटकदीप:, साक्षी, विद्यारण्य

## प्रस्तावना

विशालेऽस्मिन् अद्वैतसाम्रज्ये अद्वैतवादः विभिन्नोपायेन परिपुष्टो भवति। तत्र परिपोषकेषु ग्रन्थेषु प्रचारकेष्वाचार्येषु च आचार्यमहामुनिना विद्यारण्येन विरचितग्रन्थः "पञ्चदशी" अन्यतम असाधारणग्रन्थः। वेदान्तान्तर्गतेषु प्रकरणग्रन्थेषु "पञ्चदशी"ति ग्रन्थः प्राज्ञैः स्वीकृत अद्वितीयप्रामाणिकः ग्रन्थो वर्तते। अत्र सरलभाषया प्रामाणिकयुक्त्या शास्त्रीयदृष्टान्तमाध्यमेन च दुर्बोधतत्त्वस्य सम्यक्तया विचार: कृतो वर्तते। वेदान्तदर्शनस्य गुरुत्वपूर्णमूलतत्त्वानि अत्र विशदरूपेण ग्रथितानि सन्ति। अत्र इदृश्या सरलभाषयातिगम्भीरतत्त्वान्यालोचितानि सन्ति यत्र सर्वेषां साधारणजनानामपि प्रवेशस्सुकरस्स्यात्। अद्वैतशास्त्रसिद्धान्तान्मनसि निधाय ग्रन्थकारः अस्मिन् ग्रन्थे स्वविद्वत्पराकाष्ठां प्रदर्शयति । सर्वसाकल्येन ग्रन्थोऽयं सम्प्लुतोदकमिव सर्वजनादृतो भवतीत्यत्र नास्ति संशयः ।

अस्य ग्रन्थस्य ग्रन्थकारविद्यारण्यमुनिः पूर्वाश्रमे माधवाचार्यरूपेण परिचित आसीत् । तस्य पितुः नाम मायणः माता च श्रीमत्यासीत् ।

सायणभोगनाथौ च तस्यानुजावास्ताम्। सः मुनिः विजयनगरराज्यस्य महाराजस्य हरिहरस्य सभायां राजगुरुश्चासीत्। स च विद्यारण्यमुनिः त्रयोदशः ख्रीष्टाद्बस्य शेषांशे आविर्भूतोऽभूत् तथा चतुर्दशशतकस्य शेषांशे इहलीलासंवरणं कृतवान् चासीत्।

सः एकाधारेण असामान्यपण्डितः, धुरन्धरः कुटनितीज्ञः आसीत्। सरस्वत्याः वरपुत्रसदृशः महामुनिः विद्यारण्यः दर्शनस्मृतिज्योतिषव्याकरणप्रभृतीनां शास्त्राणामुपरि बहूनि तत्त्वसम्बलितानि पुस्तकानि विरच्य सरस्वत्याः पीठं शोभाबर्द्धनं कृतवान् आसीत्। वेदान्तदर्शनस्य उपरि विवरणप्रमेयसंग्रहः, पञ्चदशी, अनुभुतिप्रकाशः, जीवन्मुक्तिविवेकः, अपरोक्षानुभूतिटीका, श्रौतरीत्त्या उपनिषद्दीपिका, छान्दोग्योपनिषद्दीपिका, बृहदारण्यकवार्त्तिकसारः, शङ्करविजयं चेति बहवः उपादेयग्रन्थाः विद्यारण्यमहाभागेन विरचिताः। एतेषु सर्वदर्शनसंग्रहः, जैमिनीन्यायमालाविस्तरं, पराशरमाधवः, कालमाधवाख्याः तस्य प्रसिद्धाः ग्रन्थाः परिलक्ष्यन्ते। तस्य सर्वशास्त्रप्रवेशसामर्थ्यं दृष्ट्वा तं द्वितीयशङ्कराचार्यः इति प्राज्ञाः वदन्ति। एतैः विरचितेषु ग्रन्थेषु पञ्चदशीति ग्रन्थ अनन्य असाधारणो भवति। अयं ग्रन्थः पञ्चदशाध्यायात्मकः, अतः अस्य नाम पञ्चदशी इति। ग्रन्थेऽस्मिन् प्रत्येकमध्याये एकैकस्य प्रकरणस्योपरि आलोचना भवति। तत्र क्रमानुसारं प्रकरणानां नामानि भवन्ति यथा - तत्त्वविवेकप्रकरणम्, पञ्चभूतविवेकप्रकरणम्, पञ्चकोशविवेकप्रकरणम्, द्वेतविवेकप्रकरणम्, महावाक्यविवेकप्रकरणम्, चित्रदीपप्रकरणम्, तृप्तिदीपप्रकरणम्, कूटस्थदीपप्रकरणम्, ध्यानदीपप्रकरणम्, नाटकदीपप्रकरणम्, ब्रह्मानन्देयोगानन्दप्रकरणम्, ब्रह्मानन्दे आत्मानन्दप्रकरणम्, ब्रह्मानन्दे अद्वैतानन्दप्रकरणम्, ब्रह्मानन्दे विद्यानन्दप्रकरणम्, ब्रह्मानन्दे विषयानन्दप्रकरणम् इति।

तत्र प्रथमप्रकरणपञ्चके आत्मानात्मवस्तुविषयकविचारालोचना भवति। तथा प्रथमप्रकरणपञ्चकं विवेकप्रकरणमिति कथ्यते। द्वितीयप्रकरणपञ्चके शुद्धचैतन्यस्वरूपात्मविषयिणी आलोचना भवति अतः द्वितीयपञ्चकस्य नाम दीपपञ्चकमिति। तत्र तृतीयप्रकरणपञ्चके आत्मानन्दस्वरूपं प्रतिपादितमस्ति, अतः अस्य पञ्चकस्य नाम आनन्दपञ्चकमिति। एवं प्रकारेण पञ्चदशीग्रन्थे वेदान्ततत्त्वानि सरलरीत्या प्रतिपादितानि सन्ति। अतः पञ्चदशीति ग्रन्थः ग्रन्थकारस्य विद्यारण्यमहाभागस्य अमरकीर्त्तिराजीति नास्ति संशयः।

अत्रास्मिन् सन्दर्भे नाटकदीपप्रकरणोक्तसाक्षिस्वरूपनिर्वचनं किञ्चिदुपस्थाप्यते।

चेतने अध्यस्य अहंकारादेः तत्प्रकाशकसाक्षिणश्च नाटकरूपेण प्रकाशकः यः स नाटकदीप इत्युच्यते। अध्यारोपापवादाभ्यां मन्दाधिकारिणमनायासेन निष्प्रपञ्चब्रह्मात्मतत्त्वस्य बोधकरणार्थं प्रथमम् आत्मनि अध्यारोपं दर्शितवान्। सृष्टेः पूर्वं यत् अद्वयम् अर्थात् स्वगतादि भेदरहितं परमानन्दरूपं परिपूर्णं परंब्रह्म आसीत् तत् स्वनिष्टया मायया जगद्रूपं धृत्वा जीवरूपेण जगति प्रविष्टवान्[१]। अर्थात् शरीरं भूत्वा शरीरे प्रविष्टवान्। तदुक्तम् -

तद् ब्रह्म यदा विष्णवादिषु उत्तमदेहेषु प्रविष्टः तदा देवता अभवत्। यदा मर्त्यादिषु अधमदेहेषु प्रविष्टः तदा देवतां पूजयति। अयं च उत्तमाधमभावः शरीरोपाधिकृतः, न स्वाभाविकः। तदेवम् एकस्यैव ब्रह्मणः सर्वेषु शरीरेषु सत्त्वात् उत्तमाधमभावः संभवति। अनेकेषु जन्मसु स्वकृतानां कर्मणां ब्रह्मणि समर्पणरूपादयं प्राणी स्वविचारम् अर्थात् ब्रह्मरूपस्य स्वात्मनः ज्ञानसाधनश्रवणादिकर्तुमिच्छति। ततः स्वविचारजनितज्ञानद्वारा मायायां स्वस्य अद्वयानन्दत्वादिरूपस्य आच्छादिकायामज्ञानाविद्यादिशब्दवाच्यायां विनष्टायां स्वयमद्वयानन्दपूर्णं परंब्रह्म एवावशिष्यते[२]।

अद्वितीयब्रह्मणः वस्तुतः बन्धः मोक्षो वा नास्ति। अतः अद्वयानन्दरूपात्मनः द्वितीयसहितः दुःखितादिभ्रमत्वम् एव बन्धः। तस्य स्वरूपेण स्थितिः बन्धनिवृत्तिः मोक्षः[३]। अर्थात् - यः अद्वयानन्दस्वरूपः स एव सद्वितीयः दुःखितश्च भवति। इयमेव स्थितिः बन्धनमिति प्रोच्यते। वस्तुतः

अद्वितीयपरब्रह्मणि बन्धमोक्षौ निरूपयितुमशक्यौ । दुर्निरूप्यौ वा । ज्ञानेन ईदृशस्य बन्धनस्य निवृत्तिः भवति । तदा स्वस्वरूपेणावस्थानं मोक्ष इति गीयते । अतः अत्र न कोऽपि श्रुतिविरोधः। अत्र ज्ञानस्य फलं बन्धनिवृत्तिरूपमोक्षः। पुनश्चात्र ज्ञानस्य फलं ब्रह्मणः शेषत्वमित्युक्तं तत्परस्परं विरुद्धम् आसीत् । विरोधस्यास्य समाधानं जातमेव । मोक्षस्य साधनं कर्म इति वदति । तर्हि विचारजन्यमानस्य का आवश्यकता इति प्रश्नः । उत्तरं तु यत् अविचारजनितबन्धः विचारेणैव दूरी भवति । अर्थात् विचारस्य प्राग्भवेन उपलक्षिताज्ञानकृतबन्धः विचारजन्यज्ञानेन भिन्नसाधनेन न निवर्तते । अस्मात् कारणात् तत्त्वसाक्षात्कारं यावत् सदा जीवब्रह्मणी विचारयेत् ।

तत्र उपकरणसहितजीवस्य स्वरूपं यथा- यः चिदाभासविशिष्टः अहंकारः व्यवहारदशायां देहादौ अहमित्यभिमन्यते । अहमस्मि इत्यभिमानं करोति स कर्तृत्वादिधर्मविशिष्टः जीवः । तस्य जीवस्य साधनं कारणं वा कामादिवृत्तिमन्तः अन्तःकरणस्य भागैकं मनः । तस्य मनसः अन्तर्वृत्तिः बहिर्वृत्तिः क्रमादुत्थिते क्रियाद्वयम्[४] अस्ति । अत्र अन्तर्मुखवृत्तिः या 'अहं' रूपा अस्ति सा कर्तारं निर्दिशति ज्ञापयति वा । तथा बहिर्मुखवृत्तिः इदं रूपा देहात् बाह्यपदार्थानाम् 'इदम्' इति पदेन निर्दिष्टं वस्तु सूचयति । अर्थात्- मनसः अन्तर्मुखवृत्तिः अहंरूपेण वर्तमाना सती कर्तुः विषयं करोति अर्थात् कर्तारं ज्ञापयति तथैव बहिः मुखवृत्तिः 'इदं' रूपेण वर्तमाना सती शरीरात् बहिः वर्तमानं वस्तु परामृशति । तदेवमन्तर्मुखवृत्तिः 'अहम्' इति अनुभवं करोति । एवमेव बहिर्मुखवृत्तिः 'अयं घट' इति अनुभवं जनयति इति फलितम् [५]। तत्र मनसा 'इदम्' इति सामान्यमात्रं गृह्यते । परन्तु तेन इदं पदेन निर्दिष्टं वस्तु यत् गन्धरूपरसादि अस्ति तत् घ्रणादिपञ्चेन्द्रियाणि पृथक् प्रकटयन्ति । गन्धादेः ग्रहणमेव घ्रणादीनां प्रयोजनम् । तत्र ब्रह्मस्वरूपं यथा- यः चिद्रूपः अहंकाररूपं कर्तारम् अहम् इदं चेति वृत्तिरूपं क्रियां परस्परभिन्नघ्रणादिभिः ग्राह्य गन्धादिविषयान् युगपत् प्रकाशयति । वेदान्तशास्त्रे तदेव चिद्रूपः साक्षीति[६] उच्यते । स च साक्षी युगपत् सर्वं प्रकाशयति। यथा अहं रूपं पश्यामि, शब्दं शृणोमि, गन्धं जिघ्रमि, रसम् अस्वादयामि, वस्तु स्पृशामि इत्येवं रूपेण द्रष्टृदर्शनदृश्यरूपां त्रिपुटिं युगपदेव प्रकाशयति । यथा नृत्यशालायां वर्तमानः दीपः सर्वान् युगपत् प्रकाशयति [७]। नृत्यशालायां स्थापितः दीपः नृत्यशालायाः स्वामिनं दर्शकान् नर्तकीं च अविशेषेणभेदभावं विना प्रकाशयति, तथा स्वाम्यादीनामभावेऽपि स्वयमेव प्रकाशते। तदेवं यथा दीपः स्वयं प्रकाशते अन्यान् च प्रकाशयति तथैव साक्षी स्वयं प्रकाशते अन्यान् च प्रकाशयति[८] इति भावः। एवं साक्षी अहंकारं बुद्धिविषयान् अपि प्रकाशयति । सुषुप्त्यादौ अहंकाराद्यभावेऽपि तत् साक्षितया स्वयं प्रकाशते ।

यथा प्रकाशरूपा बुद्धिः एवं अहंकारादीन् प्रकाशयति तर्हि तद्भिन्नसाक्षिकल्पनं कथम् इति प्रश्ने उत्तरं यत् - कूटस्थे निर्विकारे साक्षिणि स्वप्नप्रकाशरूपचैतन्यतया सदा प्रकाशमने सति बुद्धिः तस्य साक्षिणः स्वरूपचैतन्येन प्रकाशमाना एव घटोऽयं पटोऽयम् इत्यादि ज्ञानाकारेण नृत्यति, विकृतिम् आप्नोति वा । यतः बुद्धिः विकारितया जडा, स्वतः स्फूर्तिरहिता । अतः बुद्धिभिन्नसर्वावभासकः साक्षी मन्तव्य एव ।

उक्तोऽर्थः पाठकबुद्धिसौकर्याय रूपकालङ्कारमुखेन नाटकत्वेन च निरूपितः । यथा - अर्थात् अत्र अहंकारः स्वामी वर्तते । विषयाः नाटकस्य दर्शकाः भवन्ति, बुद्धिः नर्तकी, इन्द्रियाणि मृदंगादि वाद्य तालधारिणी सन्ति । साक्षी च सर्वावभासकः दीपः९ । तदयं भावः -

| | |
|---|---|
| अहंकारः | स्वामी |
| विषयाः | नाटकस्य दर्शकाः भवन्ति, |
| बुद्धिः | नर्तकी, |
| इन्द्रियाणि | मृदंगादि वाद्य तालधारिणी सन्ति |
| साक्षी | सर्वावभासकः दीपः |

**अहंकारः प्रभुः**

यतः नाटकस्य स्वामिवत् विषयभोगस्य साफल्यवैफल्यप्रयुक्त हर्षविषादौ अहंकारस्य अस्यैव भवतः। नाटके नृत्यस्य अभिमानी नृपः नृत्यस्य साफल्यवैफल्याभिमानेन प्रसीदति, विषीदति च । स धनाढ्यत्वात् नर्तक्यादीनाम् आश्रयः । नृत्यशालायाः निर्वाहकः । अनेकदारायुक्तः, बृहत्कार्यस्य कर्ता,

विशालभोगस्य भोक्ता अस्ति । अत्र भोगस्य सफलताविफलताजन्यहर्षविषादौ अहंकारस्य भवतः । उपाधिरूपत्वात् आत्मधनयुक्तत्वात् स बुद्ध्यादेः आश्रयः । समष्टिव्यष्टिदेहरूपनृत्यशालायाः अहंभावस्य निर्वाहकः । शुभाशुभवृत्तिरूपानेकदासयुक्तः सर्वेषां कर्मणां कर्ता, सर्वेषां भोगानां भोक्ता एवं साभासाहंकारस्य नृत्याभिमानी राजतुल्यता अस्ति। अथवा जीवतुल्यता अस्ति।

**विषया:**

नाटकस्य सुखदुःख घटनातः यथा दर्शकाः अप्रभाविताः एवं सुखदुःखादितः विषयाः अप्रभाविताः भवन्ति । अर्थात् सुखदुःखे यथा दर्शकानां न भवतः, स्वामिनः भवतः एवम् अहंकारस्य सुखदुःखे भवतः न तु विषयाणाम्। अयं भावः - नृत्यशालायां विद्यमानाः दर्शकाः यथा राजधर्मरहिताः राजानं परितः परिभ्रमन्ति, एवं शब्दादिविषयाः अहंकारस्य कर्तृत्वभोक्तृत्वादिधर्मरहिताः अहंकारं परितः परिभ्रमन्ति, अहंकाराधीनाश्च भवन्ति । एवं विषयाणां सभ्यपुरुषतुल्यता।

**बुद्धिः नर्तकी**

नर्तक्याः अङ्गाङ्गभंगात् भाववत् नानाविधविकारः बुद्धौ भवति। अयं भावः - यथा नर्तकी नानाभिः नवरसवतीभिः चेष्टाभिः सर्वतः हस्तादीन् चालयन्ती राजानं रञ्जयति स्वपक्षे च आकर्षयति, तद्वत् बुद्धिः अपि कामादिरूपानेकविकारवती सती सर्व विषयाकारत्वात् अग्रभागरूपं हस्तं चालयन् अन्तःकरणे नवरसान् प्रदर्श्य साभासाहंकारं रञ्जयति । अतः बुद्धेः नर्तकीतुल्यता । चक्षुरादिइन्द्रियाणि तालादिधारिण: यतः चक्षुरादिइन्द्रियाणि बुद्धेः विकारनुकूलं व्यापारं कुर्वन्ति, तथैव तालादिधारिणः नर्तक्याः हावभावानुकूलं व्यापारं कुर्वन्ति।

एवम् इन्द्रियाणां तालादि तुल्यत्वम् । अयं भावः - यथा तालमृदङ्गादिवादकः नर्तकीचेष्टानुकूलं व्यापारं करोति एवं चक्षुरादीन्द्रियाणि अपि, बुद्धिः यं विषयं ग्रहीतुं गच्छति तत् सम्मुखे आगते सति बुद्धौ यत् परिवर्तनं भवति तदनुकूलं व्यापारम् इन्द्रियाणि कुर्वन्ति । अतः इन्द्रियाणां वादकतुल्यता।

**दीपः साक्षी**

नृत्यशालायां स्थितःदीपः अन्तः बहिः सर्वं प्रकाशयति तथा साक्षी अपि जाग्रत्काले स्वप्नकाले च विद्यमानम् अहंकारादिकं प्रकाशयति । सुषुप्तिमूर्च्छासमाधिकाले एतेषाम् अभावं प्रकाशयति तथा स्वयं गमनागमनादिविकाररहितः । अतएव साक्षिणः नाटकस्य दीपतुल्यता।

यथा दीपः स्व स्थाने अवस्थितः गमनादि विकारशून्यः स्वसमीपस्थपदार्थान् प्रकाशयति तथा त्रिषु कालेषु वर्तमानः अचलः साक्षिरूपात्मा अन्तः बहिः प्रकाशयति । "अपूर्वमनपरमनन्तरमबाह्यम्"इति श्रुत्यनुसारं साक्षिणः बाह्याभ्यन्तरविभागः न भवति । तर्हि स अन्तः बहिः प्रकाशयति इति कथनम् अयुक्तम् प्रतिभाति। उत्तरं तु यत् - बाह्याभ्यन्तर विभागः देहमादाय अस्ति न तु साक्षिणमादाय । विषयास्तु शरीरात् बहिः तिष्ठन्ति। अहंकारस्तु शरीरस्य अभ्यन्तरे। साक्षी उभयं प्रकाशयति[१०]।

'घटमहं पश्यामि' इत्यत्र प्रथमतः 'अहं' इति रूपे अन्तर अहंकारस्य साक्षितया भासितः साक्षी अनंतरं घटं पश्यामि इति एवं घटाकारवृत्तिः स्फुरणरूपेण बहिर्गमनम् अनुभवे आयाति । वस्तुतः अविकारि साक्षि बहिरन्तरं कथं प्रकाशयति इत्यस्य उत्तरं यत् -

देहान्तरे वर्तमाना बुद्धिः रूपादिग्रहणाय चक्षुरादिद्वारा भूयो भूयो बहिर्भवति । तथा च बुद्धिनिष्ठं यच्चाञ्चल्यं तद्बुद्धेः प्रकाशके साक्षिणि वृथा आरोप्यते। साक्षी वस्तुतः अचञ्चलः बहिरन्तर गमनागमनरहितश्च । प्रकाशके प्रकाशस्य चाञ्चल्यारोपः दृष्टः । तथाहि गवाक्षमार्गात् गृहे प्रविष्टः स्वल्पः प्रकाशः अचञ्चल एव वर्तते। तस्मिन् प्रकाशे पुरुषेण हस्ते नर्त्यमाने इतस्ततः चाल्यमाने वा यथा प्रकाशः चलतीव लक्ष्यते न तु चलति । एवं स्वस्थाने अर्थात् स्वस्वरूपेणावस्थितः साक्षी बहिरन्तरगमनागमनमकुर्वन् बुद्धेः चञ्चलतावशात् तथा तथा करोति इव प्रतीयते । अत्र उत्प्रेक्षालंकारमुखेन दार्ष्टान्तिकमुक्तवान्[११]। तर्हि साक्षी कुत्र अस्ति इत्यस्य समाधानं यत् साक्षी न बाह्य: अस्ति न च

आन्तरः । यतः उभौ तौ देशौ बुद्धेः विद्येते । बुद्धेः इन्द्रियादेः प्रतीतिः शान्तौ स साक्षी यत्र स्वस्वरूपेण भासते । तत्र सः साक्षी वर्तते । प्रतीतिमात्रस्य निवृत्तौ देशस्यापि प्रतीतिः न भवेत् । तर्हि साक्षी तन्निष्ठः कथं स्यादिति प्रश्ने उत्तरं यत् -

यदि कोऽपि देशः न प्रकाशेत तर्हि साक्षी देशरहितः अस्तु । यतः देशादि कल्पनाधिष्ठानस्य देशापेक्षा नास्ति । आत्मा देशादि रहितः । शास्त्रे तस्य यत्सर्वगतत्वं गदितं यत्तत् सर्वदेश कल्पनापेक्ष एव उक्तम् । वस्तुतः आत्मा स्वभावतः सर्वगतोऽपि नास्ति । स्वभावतः आत्मा अद्वितीयः असङ्गश्च । परब्रह्मणः यथा सर्वगतत्वमवास्तविकं तथा सर्वसाक्षित्वमपि । तथाहि अन्तः अथवा बहिः देशं किं वा यत्किमपि वस्तु बुद्धिः कल्पयति । आत्मा तस्मिन् वस्तुनि स्थितः साक्षी भण्यते । वस्तुतः तस्य सर्वसाक्षित्वमपि अवास्तवम् । एवम् अन्येषु वस्तुषु साक्षी बोद्धव्यः । यद्यद्रूपादिबुद्ध्या कल्प्यते तत्तत् प्रकाशयन् आत्मा तस्य तस्य उपाधेः साक्षी स्यात् । स्वतः वाचः बुद्धेः च अविषयः तर्हि स साक्षी अपि कथं स्यात् ।

तर्हि मुमुक्षुणा स: अवाङ्मनसगोचरः कथं गृह्णीयात् उत्तरं तु यत्- ब्रह्म आवाङ् मनसगोचरमेव । तस्य अग्राह्यत्वम् इष्टमेव । आत्मातु अग्राह्यम्, सर्वग्रहस्य शान्तौ स्वयमात्मा अवशिष्यते । स्वात्मभिन्नस्य द्वैतस्य मिथ्यात्वनिश्चयेन यदा द्वैतस्य प्रतीतिः नश्यति तदा स्वात्मा एव सत्यरूपेण अवशिष्यते । आत्मनः स्वप्रकाशतया स्वतः स्फूर्तौ प्रमाणस्य अपेक्षा नास्ति । यतः स स्वप्रकाशस्वरूप: अस्ति । तथा आत्मा स्वप्रकाशरूपः अतः तस्य व्युत्पत्तिसिद्धये प्रमाणं न अपेक्षितम् । इति बोध्यस्य सिद्धे अपेक्षा अस्ति इति प्रश्नः । तर्हि ब्रह्मनिष्ठगुरुमुखात् श्रुतिपठनं[१२] कुर्यात् । अतः श्रवणं कुरु इति उपदिष्टम् । यदि समस्त द्वैतप्रपञ्चः न परित्यज्यते तर्हि बुद्धेः शरणं गच्छ । शरणगमनस्य फलं यत् बुद्ध्या यद्यत् परिकल्प्यते बाह्यम् आन्तरं वा तस्य तस्य साक्षित्वेन तदधीनः परमात्मा तथैव अनुभूयताम् ।

**पादटिप्पण्य:**

1. (क) सदेव सोम्येदमग्रआदेकमेवाद्वितीयम् (छा० ६-२-१), (ख) विज्ञानमानन्दं ब्रह्म (बृ०उ० ३-९-१४), (ग) पूर्णमद: पूर्णमिदम् (शान्तिपाठ:), (घ) मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् (श्वे० ४-१०), (ङ) तदात्मानस्वयमकुरुत सत्यत्यच्चाभवत् (तै० २-६,७), (च) तत्सृष्ट्वा तदेवानुप्राविशत् (तै० २-६) (छ) अनेन जीवेनात्मनानुप्रविश्य (छा० ६-३-२)
2. तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धै: प्रमुच्यते (कै० १७)
3. कर्मणैव हि ससिंद्धिमास्थिता जनकादय: (भ०गी० ३-२०) अत्र ससिंद्धिर्नाम चित्तशुद्धिरेव अभिधीयते न मोक्षः।
4. पञ्चदशी १०-६
5. तत्रैव १०-७१०- तत्रैव १०- १५,१६
6. तत्रैव १०-९
7. तत्रैव १०-१०
8. तत्रैव १०-११
9. तत्रैव १०-१४
10. तत्रैव १०- १५,१६
11. तत्रैव १०- १९
12. आचार्याद्वैतविद्या विहिता साधिष्ठं प्रापत् इति छान्दोग्योपनिषदि।

**सन्दर्भग्रन्थसूची**


1. श्रीशङ्कराचार्यः। (सं०२०६७)। दशोपनिषद्भाष्यम् (सानुवाद)।गोरखपुरम्ः गीताप्रेस्।
2. श्रीशङ्कराचार्यः।(सं०२०६७)।तैत्तिरीयोपनिषद्भाष्यं( सानुवाद -शांकरभाष्ययुतम्)।गोरखपुरम्ः गीताप्रेस्।
3. श्रीशङ्कराचार्यः।(सं०२०७२)।छान्दोग्योपनिषद्भाष्यम् (सानुवाद-शांकरभाष्योपेम्)।गोरखपुरम्ः गीताप्रेस्।
4. श्रीविद्यारण्य:। पञ्चदशी।रामकृष्णटीकोपेता। वाराणसी - चौखम्बा संस्कृत प्रतिष्ठान।
5. श्रीशङ्कराचार्यः। (सं०२०६५)विवेकचूडामणि:।(हिन्दी - अनुवाद सहित)।गोरखपुरम्ः गीताप्रेस्।
6. उपनिषदङ्क । (सं.२०६४)गोरखपुरम्ः गीताप्रेस्।
7. श्रीगजाननशम्भुसाघले।(१९९६) उपनिषद्वाक्यमहाकोश:।वाराणसी - चौखम्बा संस्कृत प्रतिष्ठान।
8. श्रीकृष्णजोयस्।(१९९६)शाङ्करदर्शनमर्मप्रकाश:(संपा. डा.एम्.एल्.एन्.मूर्त्ति)।तिरुपति:राष्ट्रियसंस्कृतविद्यापीठम्, आन्ध्रप्रदेश:।